# ॥ श्री गणपति स्तोत्रम् ॥

श्रीगणेशाय नमः । नारद उवाच ।
प्रणम्य शिरसा देवं, गौरी पुत्रं विनायकम् ।
भक्तावासं स्मरेन्नित्यंमायुः कामार्थसिद्धये ॥१॥
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥२॥
लंबोदरं पञ्चमं च षष्ठमम् विकटमेव च ।
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टकम् ॥३॥
नवमं भालचन्द्रं च दशमं तु विनायकम् ।
एकादशं गणपतिं द्वादशं तु गजाननम् ॥४॥
द्वादशैतानि नामानि त्रिसंध्ये यः पठेन्नरः ।
न च विघ्न भयं तस्य सर्व सिद्धीकरं प्रभो ॥५॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रान् मोक्षार्थी लभते गतिम् ॥६॥
जपेत् गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् ।
संवत्सरेण सिद्धिं च लभते नात्र संशयः ॥७॥
अष्टभ्योब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् ।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ॥८॥

**॥ इति श्रीनारदपुराणे संकटनाशनं गणपति स्तोत्रं संपूर्णम् ॥**

या गणपती स्तोत्राचे २१००० पाठ मुला-मुलींनी ९ वर्ष पूर्ण होण्याअगोदर पूर्ण करावेत असे श्रीदत्तगिरी म्हणत. गणपती स्तोत्राची आवर्तने करताना फक्त १ ते ४ श्लोक वाचावेत. फलश्रृतीचे श्लोक वाचण्याची आवश्यकता नाही. फलश्रृतीचे श्लोक शेवटी एकदाच म्हणावेत.